वदिष्यसि -- " (तू)	गमिष्यति -- जायगा (वह)
वदिष्यामि -- बोलूंगा।	गमिष्यसि -- जायगा (तू)
द्रक्ष्यति -- देखेगा (वह)	गमिष्यामि -- जाऊंगा।
द्रक्ष्यसि -- " (तू)	पक्ष्यति -- पकायेगा (वह)
द्रक्ष्यामि -- देखूंगा।	पक्ष्यसि -- " (तू)
खादिष्यति -- खायेगा (वह)	पक्ष्यामि -- पकाऊंगा।
खादिष्यसि -- " (तू)	करोमि -- करता हूं

इनका उपयोग करके अब आप वाक्य बना सकते हैं—

१ यदा त्वं तत्र गमिष्यसि, तदा अहं त्वां द्रक्ष्यामि। २ कदा त्वं भूपस्य नगरं गमिष्यसि ? ३ यदा त्वं श्वः तत्र गमिष्यसि, तदा अहं अपि तत्र एव आगमिष्यामि। ४ यदा त्वं फलं खादिष्यसि तदा अहं अपि फलं खादिष्यामि। ५ यदा रामः अन्नं पक्ष्यति तदा त्वं अपि अन्नं खादिष्यसि। ६ यदा स पुस्तकं पठिष्यति तदा अहं अपि पठिष्यामि। ७ यदि त्वं तत्र न गमिष्यसि तर्हि अहं अन्नं अपि न खादिष्यामि। ८ अहं मम गृहं अद्य इदानीं गच्छामि, त्वं श्वः आगमिष्यसि। ९ कः इदानीं तत्र गमिष्यति ? १० अहं अद्य अन्नं नैव पक्ष्यामि।

१ जब तू वहां जायगा, तब मैं तुझे देखूंगा। २ कब तू राजाके नगरको जायगा ? ३ जब तू कल वहां जायगा, तब मैं भी वहां ही आऊंगा। ४ जब तू फल खायेगा तब मैं भी फल खाऊंगा। ५ जब राम अन्न पकायेगा तब तू भी अन्न खायेगा। ६ जब वह पुस्तक पढेगा तब मैं भी पढूंगा। ७ यदि तू वहां नहीं जायगा, तो मैं अन्न भी नहीं खाऊंगा। ८ मैं अपने घर आज अभी आता हूं, तू कल आवेगा। ९ कौन अब वहां जायगा ? १० मैं आज अन्न नहीं पकाऊंगा।

पाठ २०

इस पाठमें आप निम्नलिखित शब्द ध्यानमें रखिये—

धाविष्यति = धावेगा (वह)	चलिष्यामि = चलूंगा
धाविष्यसि = ,, (तू)	भविष्यति = होवेगा (वह)
धाविष्यामि = धाऊंगा	भविष्यसि = ,, (तू)
प्रापयिष्यति = पहुंचायेगा	भविष्यामि = होऊंगा।
प्रापयिष्यसि = ,, (तू)	पतिष्यति = गिरेगा (वह)
प्रापयिष्यामि = पहुंचाऊंगा	पतिष्यसि = ,, (तू)
चलिष्यति = चलेगा (वह)	पतिष्यामि = गिरूंगा।
चलिष्यसि = ,, (तू)	

अब इनका उपयोग करके आप कई वाक्य बना सकते हैं।

संस्कृत वाक्य।

१ अहं इदानीं धाविष्यामि। २ किं त्वं न धाविष्यसि ? ३ किं स मम पत्रं तं नरं प्रापयिष्यति ? ४ यदि स नगरं गमिष्यति तर्हि तव पत्रं प्रापयिष्यति। ५ तत् कथं भविष्यति ? ६ तत् एवं भविष्यति। ७ स इदानीं कूपे पतिष्यति। ८ नहि नहि, स इदानीं तस्मिन् कूपे नैव पतिष्यति। ९ पश्य तं, कथं स धावति। १० अहं पश्यामि परंतु स इदानीं न

धावति । ११ त्वं कुत्र पश्यति ?

भाषा वाक्य ।

१ मैं अब धावूंगा । २ क्या तू नहीं धावेगा ? ३ क्या वह मेरा पत्र उस मनुष्यको पहुंचायेगा ? ४ यदि वह शहरको जायेगा तो तेरा पत्र पहुंचायेगा । ५ वह कैसे होगा ? ६ वह ऐसा होगा । ७ वह अब कूवेमें गिरेगा । ८ नहीं, नहीं वह अब उस कूवेमें नहीं गिरेगा । ९ देख उसे, कैसा वह दौडता है । १० मैं देखता हूं परंतु वह अब दौडता नहीं । ११ तू कहां देखता है ?

अब निम्नलिखित शब्द स्मरण कीजिये—

मध्याह्ने = मध्यदिनमें	सायं = शामको
दिवा = दिनमें	यथा = जैसा
रात्रौ = रात्रीमें	तथा = तैसा
प्रातः = सबेरे, प्रातःकालमें	द्रुतं = शीघ्र

इन शब्दोंका उपयोग करके अब वाक्य बनाइये—

संस्कृत वाक्य ।

१ स मध्याह्ने कुत्र गच्छति ? २ यत्र रामः गच्छति तत्र एव स गच्छति । ३ त्वं रात्रौ कुत्र गमिष्यसि ? ४ अहं तव गृहं गमिष्यामि । ५ स सायं नैव गमिष्यति । ६ यदा स गमिष्यति, तदा त्वं किं करिष्यसि ?

भाषा वाक्य ।

१ वह मध्यदिनमें कहां जाता है? २ जहां राम जाता है वहां ही वह जाता है। ३ तू रात्रीमें कहां जावेगा ? ४ मैं तेरे घर जाऊंगा। ५ वह सायंकाल नहीं जावेगा। ६ जब वह जायगा, तब तू क्या करेगा ?

अब निम्नलिखित वाक्य आप सुगमतासे बोल सकते हैं—

संस्कृत-वाचन-पाठः ।

अहं तव गृहं सायं आगमिष्यामि। त्वं मम गृहं सायं सत्वरं आगच्छ। सः अद्य तस्य नगरं गमिष्यति, फलं भक्षयिष्यति। यथा स पुस्तकं पश्यति तथा पठति। नहि नहि, सः पुस्तकं पश्यति परंतु नैव पठति। स इदानीं पुस्तकं पश्यति परंतु किं न पठति ? त्वं तत्र दिवा किं न गमिष्यसि ? रामचंद्रः रात्रौ दीपस्य प्रकाशेन पुस्तकं पठिष्यति। त्वं यदि अन्नं पक्ष्यसि तर्हि अहं खादिष्यामि। तस्मिन् वने इदानीं सलिलं शोभनं भविष्यति। तस्मिन् गृहे श्वेतं वस्त्रं नास्ति। कस्मिन् गृहे रक्तं पत्रं अस्ति, वद। शीघ्रं ब्रूहि। तव पुस्तकं नवीनं अस्ति परंतु मम पुराणं अस्ति। यदा धनाढ्यः पुरुषः गमिष्यति तदा अहं अपि गमिष्यामि ॥

पाठ २१

इस पाठमें निम्नलिखित शब्द स्मरण कीजिये—

करिष्यति = (वह) करेगा	दास्यामि– (मैं) दूंगा
करिष्यसि = (तू) ,,	नेष्यति– (वह) ले जायगा
करिष्यामि = (मैं) करूंगा	नेष्यसि-- (तू) ,,
दास्यति = (वह) देगा	
दास्यसि = (तू) ,,	नेष्यामि--(मैं) ले जाऊंगा

इन शब्दोंका अब उपयोग कीजिये—

१ त्वं कर्म करिष्यसि किम्? २ नहि, अहं अद्य नैव करिष्यामि। ३ स कर्म कदा करिष्यति? ४ यदा त्वं करिष्यसि, तदा स करिष्यति। ५ स मह्यं फलं दास्यति। ६ त्वं मह्यं पुस्तकं नैव दास्यसि किम्? ७ त्वं इदानीं पुस्तकं तत्र नय। ८ अहं तत्र इदानीं नैव गमिष्यामि। ९ त्वं कदा तत्र गमिष्यसि?

१ क्या तू कार्य करेगा? २ नहीं, आज कभी नहीं करूंगा। ३ वह कार्य कब करेगा? ४ जब तू करेगा, तब वह करेगा। ५ वह मुझे फल देगा। ६ क्या तू मुझे पुस्तक नहीं देगा? ७ तू अभी पुस्तक वहां ले जा। ८ मैं वहां अब नहीं जाऊंगा। ९ तू कब वहां जावेगा?

१० अहं श्वः गमिष्यामि। ११ तर्हि अद्य कः गमि-

ष्यति? १२ प्रायः भूमित्रः अद्य सायं तत्र गमिष्यति। १३ त्वं पत्रं कदा लेखिष्यसि ? १४ अहं पत्रं अधुना एव लिखामि। १५ यदा त्वं पक्ष्यसि, तदा स कुत्र भविष्यति? १६ यदा अहं अन्नं पक्ष्यामि तदा स स्वगृहे एव भविष्यति। १७ अहं कदापि नैव पतिष्यामि।

१० मैं कल जाऊंगा। ११ तब आज कौन जायगा? १२ प्रायः भूमित्र आज शामको वहां जावेगा। १३ तू पत्र कब लिखेगा? १४ मैं पत्र अभी लिखता हूं। १५ जब तू पकायेगा, तब वह कहां होगा? १६ जब मैं पकाऊंगा तब वह अपने घरमेंही होगा। १७ मैं कबीभी नहीं गिरूंगा।

अब निम्नलिखित शब्द स्मरण कीजिये—

वदितुं = बोलनेके लिये
द्रष्टुं = देखनेके लिये
गन्तुं = जानेके लिये
पक्तुं = पकानेके लिये
प्रापयितुं = पहूंचानेके लिये
भवितुं = होनेके लिये
कर्तुं = करनेके लिये
वक्तुं = बोलनेके लिये
स्थातुं = ठहरनेके लिये
नेतुं = ले जानेके लिये
पठितुं = पढनेके लिये
खादितुं = खानेके लिये
आगन्तुं = आनेके लिये
धावितुं = दौडनेके लिये
चलितुं = चलनेके लिये
पतितुं = गिरनेके लिये
दातुं = देनेके लिये
लेखितुं = लिखनेके लिये
भ्रामयितुं = घुमानेके लिये
उपवेष्टुं = बैठनेके लिये

इन शब्दोंका उपयोग करके अब आप वाक्य बना सकते हैं—

१ अहं इदानीं तेन सह वदितुं इच्छामि। २ रामः तत्र गन्तुं इच्छति। ३ त्वं धनं दातुं न इच्छसि किं? ४ स इदानीं पत्रं लेखितुं तत्र गतः। ५ त्वं तत्र फलं प्रापयितुं किं न गच्छसि? ६ अहं कन्दुकं भ्रामयितुं गतः। ७ अहं इदानीं अत्र उपवेष्टुं इच्छामि। ८ सः अद्य पक्तुं तत्र गमिष्यति। ९ अहं अद्य सायं धावितुं इच्छामि। १० स पुरुषः शोभनं अपि फलं खादितुं किं न इच्छति? ११ स साधुः अस्ति। १२ अतः न इच्छति। १३ अहं ईशं शरणं गन्तुं इच्छामि। १४ त्वं सर्वेश्वरं शरणं गच्छ।

१ मैं अब उसके साथ बोलना चाहता हूं। २ राम वहां जानेकी इच्छा करता है। ३ क्या तू धन देनेकी इच्छा करता नहीं? ४ वह पत्र लिखनेके लिये वहां गया। ५ तू वहां फल पहुंचानेके लिये क्यों नहीं जाता? ६ मैं गेंद घुमानेके लिये गया था। ७ मैं अब यहां बैठना चाहता हूं। ८ वह आज पकानेके लिये वहां जावेगा। ९ मैं आज शामको दौडना चाहता हूं १० वह मनुष्य उत्तम भी फल खानेकी इच्छा क्यों नहीं करता? ११ वह साधु है। १२ इसलिये इच्छा नहीं करता। १३ मैं ईश्वरको शरण जानेकी इच्छा करता हूं। १४ तू सबके ईश्वरको शरण जा।

❀

पाठ २२

इस पाठमें आपको कुछ श्लोक बताये जाते हैं—

सत्यस्य वचनं श्रेयः सत्यादपि हितं वदेत् ।
यद्भूतहितमत्यन्तमेतत्सत्यं मतं मम ॥

म० भारत शांति० ३२९ । १३

पद— सत्यस्य । वचनं । श्रेयः । सत्यात् । अपि । हितं । वदेत् । यत् । भूत+हितं । अत्यन्तं । एतत् । सत्यं । मतं । मम ॥

अन्वय— सत्यस्य वचनं श्रेयः । सत्यात् अपि हितं वदेत् । यत् अत्यन्तं भूतहितं एतत् सत्यं, (इति) मम मतम् ॥

अर्थ— सत्यका भाषण (श्रेयः) कल्याण करनेवाला है । सत्यसे भी (हितं) हितकारक भाषण (वदेत्) बोलना चाहिये। जो अत्यंत (भूतहितं) प्राणिमात्रका हितकारी वचन, (एतत्) वह सत्य (है, ऐसा) मेरा मत है ।

यह श्लोक आपको विना प्रयत्न समझमें आगया होगा । कुछ शब्दोंकी कमी आपके पास इस समय है; वह यदि दूर होगी, तो ऐसे श्लोक सुगमतासे समझ सकते हैं, यह बात आपको बतानेके लिये ही इस पाठमें दो तीन श्लोक देनेका विचार किया है—

न भीतो मरणादस्मि केवलं दूषितं यशः ।
विशुद्धस्य हि मे मृत्युः पुत्रजन्मसमः किल ।

मृच्छकटिक नाटक १० । २७

पद– न । भीतः । मरणात् । अस्मि । केवलं । दूषितं । यशः । विशुद्धस्य । हि । मे । मृत्युः । पुत्र+जन्म+समः । किल ।

अन्वय– (अहं) मरणात् भीतः न अस्मि । केवलं यशः दूषितं । हि वि+शुद्धस्य मे मृत्युः किल पुत्रजन्म-समः ॥

अर्थ-- (मैं) मरणसे (भीतः) डरा हुआ नहीं हूं । केवल यश (दूषितं) कलंकित हुआ (इसलिये बुरा लगता है) (हि) क्यों कि (वि+शुद्धस्य) अत्यंत शुद्ध रहते हुए (मे) मेरा मृत्यु हुआ तो (किल) निःसंदेह पुत्रका जन्म होनेके समान है ।

पिताऽऽचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः ।
नाऽदण्डयो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति ॥

मनुस्मृति ८ । ३३५

पद–पिता । आचार्यः । सुहृत् । माता । भार्या । पुत्रः । पुरोहितः । न । अ+दण्डयः । नाम । राज्ञः । अस्ति । यः स्व+धर्मे । न । तिष्ठति ।

अन्वय– पिता आचार्यः सुहृत् माता भार्या पुत्रः पुरोहितः यः स्व+धर्मे न तिष्ठति, (सः) राज्ञः अ+दण्डयः नाम न अस्ति ।

अर्थ—पिता, आचार्य, (सुहृत्) मित्र, माता, (भार्या) स्त्री, पुत्र, पुरोहित [कोई भी तो] जो स्वधर्ममें नहीं रहता वह (राज्ञः) राजाके लिये (अ+दण्ड्यः) अदण्डनीय नहीं है अर्थात् राजा उनको दंड दे सकता है।

न तेन वृद्धो भवति येनाऽस्य पलितं शिरः।
यो वै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः॥

मनुस्मृति २।१५६

पद—न। तेन। वृद्धः। भवति। येन। अस्य। पलितं। शिरः। यः। वै। युवा। अपि। अधीयानः। तं। देवाः। स्थविरं। विदुः॥

अन्वय—येन अस्य पलितं शिरः तेन वृद्धः न भवति। यः वै युवा अपि अधीयानः तं देवाः स्थविरं विदुः॥

अर्थ—(अस्य) इसका (पलितं) सफेद सिर हुआ इससे ही वृद्ध नहीं होता। जो (वै) निश्चयसे (युवा) जवान है परंतु (अधीयानः) ज्ञानवान् है उसको (देवाः) ज्ञानी लोग (स्थविरं) वृद्ध (विदुः) जानते हैं।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
काम: क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥
भगवद्गीता १६।२१

पद्- त्रि+विधं। नरकस्य। इदं। द्वारं। नाशनं। आत्मनः। कामः। क्रोधः। तथा। लोभः। तस्मात्। एतत्। त्रयं। त्यजेत्।

अन्वय- आत्मनः नाशनं नरकस्य एतत् त्रिविधं द्वारं। कामः क्रोधः लोभः। तस्मात् एतत् त्रयं त्यजेत्॥

अर्थ- अपना नाश करनेवाला नरकका यह (त्रिविधं) तीन प्रकारका द्वार है। काम, क्रोध और लोभ [यही वह द्वार है] इसलिये (एतत्) ये (त्रयं) तीन (त्यजेत्) छोड दें। दूर करें।

पाठक इन श्लोकोंको बार बार पढें और पढते ही अर्थ ध्यानमें आता है वा नहीं देख लें। पांच छः बार पढते ही अर्थ समझ जायगा। इतने थोडेसे पाठ होते ही पाठकोंकी योग्यता कितनी हुई है, यह इस पाठमें पाठक अनुभव करें।

इस पुस्तककी पद्धति नवीन है। परन्तु यह पद्धति इतनी सुगम है कि पाठक इससे एक वर्षके अन्दर ही संस्कृत भाषामें स्वयं प्रवेश कर सकेंगे।

पाठ २३

अब इस पाठमें निम्नलिखित शब्द स्मरण कीजिये—

च–और	अपि–भी
वा–किंवा	नोचेत्–नहीं तो
अथवा–किंवा	हि–क्यों कि
किंवा– ,,	चेत्–यदि
प्रभूतं–बहुत	न्यूनं–थोडा

अब इनका वाक्योंमें उपयोग कीजिये—

१ यदि सः अद्य अत्र आगमिष्यति तर्हि त्वं तत्र न गच्छ, नोचेत् श्वः प्रातः एव गच्छ। २ किं त्वं पुस्तकं पठिष्यसि अथवा स पठिष्यति? ३ स सदा प्रभूतं वदति। ४ त्वं वद नोचेत् अहं वदिष्यामि। ५ सत्यं अपि अयुक्तं न वद।

१ यदि वह आज यहां आवेगा तो तू वहां न जा, नहीं तो कल प्रातः ही वहां जा। २ क्या तू पुस्तक पढेगा अथवा वह पढेगा? ३ हमेशा वह बहुत बोलता है। ४ तू बोल, नहीं तो मैं बोलूंगा। ५ सच भी (परन्तु) अयोग्य न बोल।

अब आप निम्न लिखित वाक्य पढते ही समझ जांयगे।

यदि सः अद्य इदानीं फलं न खादति तर्हि त्वं इदानीं एव खाद। त्वं श्वः कुत्र गमिष्यसि? यदि सः अद्य न आगमिष्यति तर्हि अहं तस्य गृहं श्वः सायं

गमिष्यामि। कः तत्र इदानीं एवं वदति ? तत्र रामभद्रः अस्ति स एवं वदति। नहि नहि, तत्र रामचंद्रः नास्ति। तर्हि कः सः? स हरिश्चंद्रः अस्ति। स कः हरिश्चंद्रः? स नागपुरदेशीयः विष्णुमित्रस्य पुत्रः हरिश्चंद्रः इदानीं एव नागपुरात् अत्र आगतः। स शोभनः पुरुषः अस्ति। स नागपुरं कदा पुनः गमिष्यति ? सः परश्वः सायं नागपुरं प्रति गमिष्यति अथवा श्वः एव गमिष्यति। स केन सह आगतः ? स देवदत्तेन सह आगतः। देवदत्तः अपि तेन सह गमिष्यति किम्? नहि देवदत्तः अत्र एव स्थास्यति, स एव गमिष्यति। त्वं इदानीं किं करिष्यसि ? अहं इदानीं न किमपि करोमि।

अब निम्नलिखित शब्द स्मरण कीजिये—

नगरं – शहर	पुष्पं – फूल
उद्यानं– बाग	चंदनं – चंदन
तोयं – जल	वस्त्रं – कपडा
नीरं – ,,	तिमिरं– अंधेरा
उदकं – ,,	पात्रं – बरतन
नखं – नाखून	अन्नं – अन्न
दुग्धं – दूध	पीतं – पिया

इनके उपयोगसे अब आप कई वाक्य बना सकते हैं—

श्रीरामचंद्रस्य नगरं अयोध्या नाम अस्ति। श्री-

कृष्णस्य नगरं द्वारका नाम अस्ति। त्वया दुग्धं किं न पीतम्? मया दुग्धं न पीतम्। तत्र दुग्धं नास्ति, तत्र नीरं अस्ति। मम वस्त्रं तेन इदानीं नीतम्। तस्मिन् गृहे त्वं उपविश। अहं इदानीं मध्याह्नसमये सूर्यस्य किरणे, सूर्यस्य प्रकाशे वा उपविशामि। तव नखं कथं न रक्तं अस्ति? कथं पीतं एव दृश्यते? तस्मिन् कूपे उदकं नास्ति। तस्मिन् जले कमलस्य पुष्पं न भवति।

निम्नलिखित भाषा वाक्यके संस्कृत वाक्य बनाइये—

मैं अब घर जाता हूं। दूध कहां है? वह कहां गया है? मैं अभी घरसे आया। वह सूर्यके किरणमें क्यों नहीं जाता? उसका घर कहां है? उसका बाग कहां है? बलराम कहां गया? तू वहां क्यों नहीं जाता है?

निम्नलिखित संस्कृत वाक्योंके भाषावाक्य बनाइये—

अहं इदानीं गृहात् अत्र आगतः। फलं कुत्र अस्ति? त्वया जलं किं न आनीतम्? स इदानीं जलं न आनेष्यति किम्? स किं पश्यति? स तत्र तव पत्रं न नेष्यति। अहं एव मम पुस्तकं तव गृहं प्रति प्रापयिष्यामि। तव गृहं कुत्र अस्ति? स कथं न आगच्छति? यदि स इदानीं न आगतः तर्हि श्वः प्रातःकाले आगमिष्यति। तस्मिन् कूपे प्रभूतं जलं अस्ति। त्वं पश्यसि किम्? तत्र इदानीं सः न भवति।

पाठ २४

यदि पाठकोंके पूर्व पाठ ठीक हो चुके हैं तो इस पाठके वाक्य उनको विना परिश्रम समझ सकते हैं। इसमें पूर्व पाठोंके ही वाक्य संधि बनाकर दिये हैं—

तस्य गृहमत्र नास्ति। स इदानीं कुत्राऽस्ति? तस्य नगरमधुना गच्छ। तेन तुभ्यं किं दत्तम्? केन तस्मै फलं दत्तम्? तस्मान्नगरादत्राऽऽगच्छ। तस्येश्वरस्य वाचकः प्रणवोऽस्ति।

तस्मिन्नगरे तव गृहं कस्मिंस्थानेऽस्ति। रामचन्द्रस्य गृहस्य समीपे मम गृहमस्ति। सूर्यस्य प्रकाशे स तिष्ठति। सूर्यस्य किरणे पुस्तकं किं पठसि? तेन मह्यं पुस्तकं दत्तम्। तदहमिदानीं चंद्रस्य प्रकाशे न पठामि। त्वं दीपस्य प्रकाशे पुस्तकं पठसि किम्? नहि नहि, अहं दीपस्य प्रकाशे पुस्तकं न पठामि। अहं ह्यो रामचंद्रस्य गृहं गतः। तत्रेन्द्रदत्तः किं पश्यति? स फलं किं न खादति? सोमेन दत्तं फलं स न खादति। रामस्य शोभनं पुस्तकं कुत्रास्ति? तन्नगरं गच्छ। स त्वां पश्यति। अहमत्र त्वां पश्यामि। कथं स तत्र गच्छति? स तत्र नास्ति।

हे रामचंद्र! त्वं फलं खाद। हे मनुष्य! पुस्तकं

पठ। त्वं तत्र गच्छ। इदानीं सत्वरं धाव। सत्यं वद्। पत्रं लिख। फलं तत्र नय।

ब्रूहि, स इदानीं कुत्र गतः? वद्, त्वमधुना किं पठसि? चक्रं भ्रामयेदानीम्। अधुना धाव। फलं शीघ्रं खाद्। रामस्य शोभनं पुस्तकं कृष्णस्य गृहं नय। तव रक्तं वस्त्रं कः पश्यति? मम पीतं वस्त्रं शीघ्रं तत्र नय। अत्रैवोपविश। इदानीमहमत्रैव तिष्ठामि, त्वं शीघ्रमत्रागच्छ। तं तस्य गृहं प्रापय। मम पत्रं तत्र नय। तस्मायेकं पत्रं देहि। तं देशं गच्छ। अधुना ब्रूहि, त्वया किमुक्तम्? स कदापि युक्तं न वदति। अहं सदा युक्तं सत्यमेव वदामि। गृहस्य समीपं स लिखति। स इदानीं वने वृक्षस्य समीपं तिष्ठति। फलं देहि। पुस्तकं नय। पत्रं लिख।

यः शूरः पुरुष इदानीं मम नगरेऽस्ति स एव तत्राद्य गच्छति। यं त्वमिदानीं तत्र पश्यसि स एव स भूपः। येन तुभ्यं धनं दत्तं स एव वीरोऽस्ति। तस्मान्नगरा-दिदानीं यो मनुष्य आगतः स एव यज्ञदत्तशर्माऽस्ति। यस्य पुरुषस्य पुस्तकं त्वं पठसि स एव मम गृहे इदानीमस्ति। यस्मिन्गृहे स नरोऽस्ति, तद् गृहं कुत्रास्ति? तस्य भूपस्य किं नगरम्?

यदा त्वं तत्र गमिष्यसि, तदाऽहं त्वां द्रक्ष्यामि। कदा त्वं भूपस्य नगरं गमिष्यसि ? यदा त्वं श्वस्तत्र गमिष्यसि, तदाऽहमपि तत्रैवागमिष्यमि। यदा त्वं फलं खादिष्यासि, तदाऽहमपि फलं खादिष्यामि। यदा रामोऽन्नं पक्ष्यति तदा त्वमप्यन्नं खादिष्यासि। यदा स पुस्तकं पठिष्यति तदाऽहमपि पठिष्यामि। यदि त्वं तत्र न गमिष्यासि तर्ह्यहमन्नमपि न खादिष्यामि। अहं मम गृहमद्येदानीं गच्छामि, त्वं श्व आगमिष्यसि। क इदानीं तत्र गमिष्यति ? अहमद्याऽन्नं नैव पक्ष्यामि।

अहमिदानीं धाविष्यामि। त्वं न धाविष्यसि ? किं स मम पत्रं तं नरं प्रापयिष्यति ? यदि स नगरं गमिष्यति तर्हि तव पत्रं प्रापयिष्यति। तत्कथं भविष्यति ? तदेवं भविष्यति। स इदानीं कूपे पतिष्यति। नहि नहि, स इदानीं तस्मिन्कूपे नैव पतिष्यति। पश्य तं, कथं स धावति। त्वं कुत्र पश्यति ?

सूचना—पाठकोंको यदि कुछ वाक्य समझमें नहीं आये तो वे पूर्व पाठोंमें इन वाक्योंको देख सकते हैं।

पाठ २५

संस्कृत-वाचन-पाठः।

स मध्याह्ने कुत्र गच्छति? यत्र रामो गच्छति तत्रैव स गच्छति। त्वं रात्रौ कुत्र गमिष्यसि? अहं तव गृहं गमिष्यामि। स सायं नैव गमिष्यति, तदा त्वं किं करिष्यसि?

अहं तव गृहं सायमागमिष्यामि। त्वं मम गृहं सायं सत्वरमागच्छ। सोऽद्य तस्य नगरं गमिष्यति। फलं भक्षयिष्यति। यथा स पुस्तकं पश्यति, तथा पठति। नहि नहि, स पुस्तकं पश्यति परंतु नैव पठति। स इदानीं पुस्तकं पश्यति परंतु किं न पठति? त्वं तत्र दिवा किं न गमिष्यसि? रामचंद्रो रात्रौ दीपस्य प्रकाशेन पुस्तकं पठिष्यति। त्वं यदन्नं पक्ष्यसि तद्व्यहं खादिष्यामि। तस्मिन्वन इदानीं सलिलं शोभनं भविष्यति। तस्मिन्गृहे श्वेतं वस्त्रं नास्ति। कस्मिन्गृहे रक्तं वस्त्रमस्ति? वद। शीघ्रं ब्रूहि। तव पुस्तकं नवीनमास्ति परंतु मम पुराणमस्ति। यदा धनाढ्यः पुरुषो गमिष्यति, तदाऽहमपि गमिष्यामि।

त्वं कर्म करिष्यसि किम् ? नहि, अहमद्य नैव करिष्यामि। स कर्म कदा करिष्यति ? यदा त्वं करिष्यसि,तदा स करिष्यति। स मह्यं फलं दास्यति। त्वं मह्यं पुस्तकं नैव दास्यसि किम्। त्वमिदानीं पुस्तकं तत्र नय। अहं तत्रेदानीं नैव गमिष्यामि। त्वं कदा तत्र गमिष्यसि ? अहं श्वो गमिष्यामि। तर्ह्यद्य को गमिष्यति ? प्रायो भूमित्रोऽद्य सायं तत्र गमिष्यति। त्वं पत्रं कदा लेखिष्यसि ? अहं पत्रमधुनैव लिखामि। यदा त्वं पक्ष्यसि, तदा स कुत्र भविष्यति ? यदाऽहमन्नं पक्ष्यामि तदा स स्वगृह एव भविष्यति। अहं कदापि नैव पतिष्यामि।

अहमिदानीं तेन सह वदितुमिच्छामि। रामस्तत्र गन्तुमिच्छति। त्वं धनं दातुं नेच्छसि किम् ? स इदानीं पत्रं लेखितुं तत्र गतः। त्वं तत्र फलं प्रापयितुं किं न गच्छसि ? अहं कंदुकं भ्रामयितुं गतः। अहमिदानीमत्रोपवेष्टुमिच्छामि। सोऽद्य पक्तुं तत्र गमिष्यति। अहमद्य सायं धावितुमिच्छामि। स पुरुषः शोभनमपि फलं खादितुं किं नेच्छति ? स साधुरस्ति। अतो नेच्छति। अहमीशं शरणं गन्तुमिच्छामि। त्वं सर्वेश्वरं शरणं गच्छ।

यदि सोऽद्यात्रागमिष्यति तर्हि त्वं तत्र न गच्छ। नोचेच्छ्वः प्रातरेव गच्छ। किं त्वं पुस्तकं पठिष्यसि? अथवा स पठिष्यति? स सदा प्रभूतं वदति। त्वं वद। नोचेदहं वदिष्यामि। सत्यमप्ययुक्तं न वद। यदि सोऽद्येदानीं फलं न खादति तर्हि त्वमिदानीमेव खाद। त्वं श्वः कुत्र गमिष्यसि? यदि सोऽद्य नागमिष्यति तर्ह्यहं तस्य गृहं श्वः सायं गमिष्यामि। कस्तत्रेदानीमेव वदति? तत्र रामभद्रोऽस्ति स एवं वदति।

नहि नहि, तत्र रामचंद्रो नास्ति। तर्हि कः सः? स हरिश्चन्द्रोऽस्ति। स को हरिश्चन्द्रः? स नागपुरदेशीयो विष्णुमित्रस्य पुत्रो हरिश्चन्द्र इदानीमेव नागपुरादत्रागतः। स शोभनः पुरुषोऽस्ति। स नागपुरं कदा पुनर्गमिष्यति? स परश्वः सायं नागपुरं प्रति गमिष्यति। अथवा श्व एव गमिष्यति। स केन सह आगतः? स देवदत्तेन सहागतः। देवदत्तोऽपि तेन सह गमिष्यति किम्? नहि, देवदत्तोऽत्रैव स्थास्यति। स एव गमिष्यति? त्वमिदानीं किं करिष्यसि? अहमिदानीं न किमपि करोमि।

पाठ २६

अहं वदामि। विष्णुमित्रेण सहाहं वदामि। अहं विष्णुशर्मणा साकं वदामि। त्वं हरिश्चन्द्रेण साकं किं वदसि? स त्वया सह किं वदति? त्वं तं किं वदसि? रामेण सह गोविंदः कदा वदिष्यति? स कं वदति? स कुत्र वदति? देवदत्तो वदति। वदति विश्वामित्रः। रघुनाथः पठति। गदाधरः खादति। खादति रघुनाथः। हे देवदत्त त्वं किं खादसि? हरिश्चन्द्र त्वं फलं खादसि किम्? अहं फलं खादामि। अहं किमपि न खादामि। स किमपि खादति किम्? माधवो न खादति किमिदानीं फलम्? त्वमिदानीं न खादसि किम्? अत्राहं पठामि। यत्राहं पठामि, तत्र स पठति। यत्र स पठति तत्राहं पठामि। यत्राहं पठामि तत्र त्वं पठ। अधुना त्वं पठ। अहं सूर्यं पश्यामि। त्वामहं पश्यामि। रामचन्द्रः त्वां पश्यति। कः त्वां पश्यति? त्वं कं पश्यसि? त्वां कः पश्यति? पश्यति कः त्वाम्? त्वं गदाधरं पश्यसि किम्?

त्वं तत्र पश्यसि। अधुना स पश्यति। इदानीं त्वं पश्यसि। त्वं कुत्र गच्छसि? त्वं काशीं गच्छसि किम्? कः काशीं गच्छति? अहं वेणुग्रामं

गच्छामि । अहं नगरं गच्छामि । रामचन्द्रो नगरं गच्छति । रघुनाथः पात्रं पश्यति । त्वं पात्रं पश्यसि। पश्यति रघुनाथो जलम् । जलं अहं पश्यमि । त्वं जलं पश्यसि किम् ? रघुनाथो जलं पश्यति किम् ? हरिश्चन्द्रो गच्छति । देवदत्त त्वं गच्छसि। मित्र अहं गच्छामि, त्वमपि गच्छ । मैत्रः तत्र पठति । मित्र त्वं तत्र पठसि किम् ? अहं तत्र पठामि । तत्राहं खादामि ।

तत्र त्वं खादसि । रामचंद्रः तत्र खादति । हरिश्चन्द्रः तत्र पश्यति । त्वं तत्र पश्यसि । अहं तत्र पश्यामि । रघुनाथः तत्र गच्छति । त्वं तत्र गच्छसि । तत्र त्वं गच्छसि । गच्छसि त्वं तत्र । तत्र रघुनाथो गच्छति । गच्छति रघुनाथस्तत्र । अहं तत्र गच्छामि । तत्र गच्छाम्यहम् । तत्राहं गच्छामि । खादाम्यहं तत्र । तत्राहं खादामि । खादामि तत्राहम् । खादसि त्वं तत्र । तत्र त्वं खादसि । खादति रघुनाथस्तत्र । रघुनाथस्तत्र खादति । गदाधरः पठति । पठति गदाधरो ग्रन्थम् । पठति ग्रन्थं गदाधरः । हे कृष्ण, तत्र त्वं पठसि । पठसि किं त्वं तत्र ? रघुनाथस्तत्र पठति । अहं तत्र पठामि । पठाम्यहं तत्र । तत्राहं पठामि । रघुनाथः कुत्र पठति ?

कुत्र पठति रघुनाथः ? पठति रघुनाथः कुत्र ? त्वं कुत्र पठसि ? कुत्र त्वं पठसि ? पठसि त्वं कुत्र ? अहं कुत्र पठामि ? कुत्राहं पठामि ? पठाम्यहं कुत्र ? अहं कुत्र खादामि ? कुत्राहं खादामि ? खादाम्यहं कुत्र ? त्वं कुत्र खादसि ? कुत्र त्वं खादसि ? खादसि त्वं कुत्र ? रघुनाथः कुत्र खादति ? खादति रघुनाथः कुत्र ? कुत्र रघुनाथः खादति ?

रामचन्द्रः कुत्र पश्यति ? पश्यति कुत्र रामचन्द्रः ? कुत्र रामचन्द्रः पश्यति ? त्वं कुत्र पश्यसि ? कुत्र त्वं पश्यसि ? पश्यसि त्वं कुत्र ? अहं कुत्र पश्यामि? कुत्राहं पश्यामि ? पश्याम्यहं कुत्र ? हरिश्चन्द्रः कुत्र गच्छति ? कुत्र हरिश्चन्द्रो गच्छति ? गच्छति कुत्र हरिश्चद्रः ? त्वं कुत्र गच्छसि ? कुत्र गच्छसि त्वम् ? गच्छसि त्वं कुत्र ? गदाधरो गच्छति कुत्र ? अहं कुत्र गच्छामि ? गच्छाम्यहं कुत्र ? कुत्राहं गच्छामि? अत्र रामचन्द्रः पठति । पठत्यत्र रामचंद्रः । रामचन्द्रो-ऽत्र पठति । त्वमत्र पठसि । पठस्यत्र त्वम् । अत्र त्वं पठसि। अहमत्र पठामि । पठाम्यहमत्र । अत्राहं पठामि । यत्र हरिश्चन्द्रः पठति । पठति यत्र हरिश्चन्द्रः। हरिश्चन्द्रो यत्र पठति । यत्र त्वं पठसि ।

पाठ २७

यदा स न पश्यति, तदा त्वं पश्यसि। यदा त्वं पश्यसि, तदाहं न पश्यामि। यदाहं पश्यामि तदा स न पश्यति। तदा रामचन्द्रः गच्छति। रघुनाथ-स्तदा नैव गच्छति। तदा त्वं नैव गच्छसि। अहं यदा नैव गच्छामि, तदा त्वं गच्छसि। स यदा नैव गच्छति, तदा त्वं गच्छसि। त्वं यदा नैव गच्छसि, तदा स गच्छति। रघुनाथः कदा गच्छति ? सः इदानीं न गच्छति। रामचन्द्रः कदा खादति ? इदानीं स नैव खादति। किं इदानीं स न खादति? न स इदानीं खादति किं स तत्र गच्छति ? नहि, स तत्र नैव गच्छति। त्वं तदा पठसि किम् ? नाहं तदा पठामि । तदा त्वं किं न पठसि ? रघुनाथः कदा पठति ? अहं कदा पठामि ? त्वं कदा पठसि ? यदा रामः पठति, तदा कृष्णो न पठति। कृष्णो यदा पठति, तदा रामो न पठति।

यदा हरिश्चन्द्रः खादति, तदा रामो गच्छति। यः खादति तं हरिश्चन्द्रः पश्यति। सूर्यं हरिश्चन्द्रः पश्यति। त्वं सूर्यं पश्यसि किम् ? रामः सूर्यं न पश्यति। अहं सूर्यं पश्यामि। त्वं सूर्यं न पश्यसि। अहं सूर्यं न पश्यामि। रामस्य जनकः सूर्यं पश्यति। वायुः

गच्छति । सोमः गच्छति। वायुर्न गच्छति। सोमो न गच्छति । हरिश्चन्द्रस्य जनकः कदा सोमं पश्यति ? कृष्णस्य जनकः सोमं न पश्यति किम् ? सर्वमित्रस्य जनकः सोमं न पश्यति किम् ? सर्वमित्र आगच्छति किम् ? किं त्वमागच्छसि ? अहमागच्छामि, सोमं पश्यामि च। हरिश्चन्द्रः किमपि न खादति। रामः किमपि न पश्यति । कृष्णः किमपि न पठति । खादति न किमपि रामः । कृष्णः किमपि खादति । न त्वं किमपि खादसि । न खादाम्यहं किमपि। अद्याहं गच्छामि । त्वमद्य गच्छसि किम् ? सोऽद्य गच्छति ।

अद्य रामचंद्रो गच्छति । हरिश्चंद्रोऽद्य नगरं गच्छति । रघुनाथः कृष्णस्य वस्त्रं पश्यति। गोपालो नगरमागच्छति । यज्ञमित्रो वनं गच्छति । विष्णुमित्रः पुस्तकं पठति । सूर्यो गच्छति । वायुरागच्छति । सोमो यदा आगच्छति, तदा त्वं मा खाद । स पुरुष इदानीं पश्यति । त्वं मा पश्य । तृणस्य वर्णो हरितः भवति । रामस्य हस्तः ह्रस्वोऽस्ति । कृष्णस्य हस्तो दीर्घः अस्ति। चन्द्रमित्रस्य गल्लः शोभनः अस्ति । तव ओष्ठो रक्तोऽस्ति। रामस्य ओष्ठो यथा रक्तोऽस्ति न तथा कृष्णस्य । भूपो वदति।

भूपः नगरं गच्छति । भूपः सायं पात्रेण जलं पिबति । भूपः फलं खादति । भूपः पत्रं लिखति। भूपः तं पुरुषं पश्यति । भूपः पादाभ्यां गच्छति । भूपः पुष्पं दास्यति । भूपः केशान्पश्यति । उद्याने भूपस्तिष्ठति । अधुना गृहे नैव तिष्ठति भूपः । ह्य एव नगरं गतो भूपः । भूपस्य वस्त्रं रक्तं अस्ति । कदा भूपो द्वारेण गच्छति ? भूपस्य नयनं शोभनमास्ति । भूपो विज्ञोऽस्ति । वाचालो नास्ति भूपः । भूपोऽम्बरे सोमं पश्यति । भूपः सूर्यं अधुना पश्यति ।

देवदत्तस्य जनकः कृपणः इति जनो वदति । जन उद्यानं गच्छति । गच्छति ग्रामं जनः । जनः अन्धः अस्ति । जनः किमपि न करोति । जनः किं न वदति वदिष्यति च ? जनः किं न द्रक्ष्यति खादिष्यति वा ? जनो ग्रामं गच्छति । जनो ग्रामादागच्छति । जनो वदति । जनः पठति ग्रंथम् । जनः पश्यति देवम् । खादति फलं जनः । जनः अस्ति । जनो भवति । जनः पतति । जनो लिखति । जनः पचति । जनस्तिष्ठति । जनो धावति । जनो वदिष्यति । जनो द्रक्ष्यति त्वाम् । जनः खादिष्यति फलम् । गमिष्यति ग्रामं जनः । जनोऽन्नं भक्ष्यति । जनो धाविष्यति । जनः उद्यानं प्रति तोयं प्रापयिष्यति ।

पाठ २८

जनो ग्रामाच्चलिष्यति। जनः शोभनो भविष्यति। तिमिरे जनः पतिष्यति। जनः किमपि करिष्यति। दास्यति जनः। जलं नेष्यति जनः। जनो द्रष्टुं धावति। कृष्णो वदिष्यति। कृष्णस्त्वां द्रक्ष्यति। कृष्णः फलं खादिष्यति। कृष्णो गमिष्यति नगरम्। कृष्णो वनं गमिष्यति। कृष्णो नरं द्रक्ष्यति। कृष्णो द्रष्टुं धाविष्यति। कृष्णो मां प्रापयिष्यति। कृष्णश्चलिष्यत्युद्यानात्। कृष्णो मूढो भविष्यति। कृष्णः पतिष्यति। कृष्णः पुस्तकं करिष्यति। कृष्णो वस्त्रं दास्यति। कृष्णो वस्त्रं नेष्यति। कथं कृष्णो वस्त्रं नेष्यति? कृष्णो वाचालो भवति। कृष्णो बलिष्ठो भवति। विज्ञोऽस्ति कृष्णः। कृष्णो बधिरोऽस्ति। कृष्णो धनाढ्योऽस्ति। कृष्णो ग्रामं गतः। कृष्णो ग्रामादागतः। कृष्णेन त्वां प्रति किमुक्तम्? मां प्रति किं दत्तम्? किं पीतं कृष्णेन?। शोभनोऽस्ति कृष्णः। कृष्णो धीरोऽस्ति किम्? अस्त्युदारः कृष्णः।

रामस्य करः नीलः अस्ति। कृष्णस्य न तथा यथा रामस्यास्ति। परंतु कृष्णस्य श्वेतः अस्ति। तव करः दीर्घः अस्ति किम्? रामस्य करः शोभनोऽस्ति। न तथा तव करः शोभनः। तस्य करः

चलति। रघुनाथः खादति करेण। रामः करेण फलं खादति। चैत्रस्य करः कोमलः अस्ति। मैत्रः करेण वस्त्रं दास्यति। मम करः त्वां भूषणं दास्यति। रामभद्रस्य स्कंधः शोभनः अस्ति। भूमित्रस्य केशाः कृष्णाः सन्ति। जनाः फलानि खादन्ति। पुरुषौ फलानि खादतः। पुरुषौ लिखतः पत्रम्।

शोभनस्य गृहस्य द्वारं विशालमस्ति। विशालस्य नगरस्य गृहाणि शोभनानि सन्ति। धनाढ्यस्य जनस्य केशाः कथं सन्ति? रामशर्मा अधुना स्कंधं पश्यति। कृष्णस्तव स्कंधं पश्यति। रामो निरंतरं वदिष्यति। त्वं सदा किं वदिष्यसि? अधुना देवदत्तस्तत्र गच्छति। मनुष्यः शब्दं पठति। नरः नरेण साकं गच्छति। तव केशः शुभ्रः अस्ति। उदारस्य तस्य नरस्य ओष्ठो रक्तोऽस्ति। करे फलं पतति। करात् पतति फलम्। करात् भूषणं पतति। भूषणं करे पतति। तव हस्ते कदा फलमागच्छति। सर्वमित्रस्य पादः शुभ्रः अस्ति। नगरात् शब्द आगच्छति। वनात् शब्द आगच्छति। मध्याह्ने शब्द आगमिष्यति। ग्रामादुदारो मनुष्यस्तोयं दातुमागच्छति।

पाठ २९

देवदत्तः पादाभ्यां गच्छति । मैत्रः पादाभ्यां मध्याह्ने गच्छति । चैत्रः पादाभ्यां सत्वरं गच्छति ग्रामम् । भूमित्रो दंतैः खादति फलम् । कृपणो मनुष्यो द्रव्यं नैव दास्यति । मनुष्यः पत्रं जले पश्यति । सः मनुष्यः पात्रे जलं पश्यति । त्वं पश्यसि किम् ? अहं पश्यामि । सः वने जलं पश्यति । देवदत्तो वनं द्रष्टुं गतः । त्वमप्यागच्छ । वनं द्रष्टुं गच्छ । चैत्र त्वं पत्रं लिख ।

देवदत्तः ह्यः श्रीनगरादागतः । विष्णुमित्रः श्वो गमिष्यति राजपुरम् । हे नर ! त्वं गमिष्यसि किम्? हे देव ! त्वं उपवेष्टुं इच्छसि किम् ? किं देवो गमिष्यति ? पुरुषः किं खादिष्यति ? फलं खादिष्यति । दुग्धस्य वर्णः श्वेतोऽस्ति । उद्यानस्य वर्णः हरितः अस्ति । तोयस्य वर्णः शुभ्रः अस्ति । तस्य पुष्पस्य वर्णः कृष्णः अस्ति । नीरं शुभ्रं अस्ति । किं त्वमिदानीं न पठसि ? अहं सदा तत्र पश्यामि । भूमित्रो यत्र पश्यति, तत्र चैत्रो गच्छति । भूपः कं पुरुषं पश्यति ? अधुनाऽहं भूपं पश्यामि । त्वं कदा तत्र वदसि ? यदा रघुनाथस्तत्र गच्छति तदा त्वम-

आगच्छ। कृष्णो भूपोऽस्ति । तदानीं रघुनाथो रामचंद्रं वदति । तदानीं रघुनाथो रामचंद्रं पश्यति। कृष्णोऽधुना कुत्रास्ति ? रामोऽद्य कुत्रास्ति ? यत्र पादः पतति, तत्र कोऽपि नास्ति। यत्र गोविंदः पश्यति, तत्र त्वं नासि। यत्र त्वं पश्यसि, तत्र मुकुंदो नास्ति ।

यत्राहं पश्यामि तत्र त्वं नासि । यदा राम आगच्छति, तदा विष्णुर्गृहं गच्छति । स किं किमपि न वदति ? विष्णुरिदानीं किमपि न पठति । यथा गोविंदः पठति तथा मुकुंदो गच्छति, तथा हरिः किं न गच्छति ? अहं पठामि । अहमद्य पठामि । अहमद्य न पठामि । अहमद्यात्र वदामि । त्वमद्यात्र किं न वदसि ? सोऽद्यात्र किं न वदति ? सोऽद्य तत्र खादति। किं त्वमिदानीं तत्र पश्यसि ? नहि, अहं अद्य अत्र पश्यामि । अधुना त्वं खादसि किम् ? मुकुंदः कुत्रास्ति ? रामस्तत्र नास्ति । त्वमद्य तत्र किं न पठसि ? कमलस्य कः वर्णः ? कमलस्य शुभ्रो वर्णः। दुग्धस्य कः वर्णः ? श्वेतो वर्णः दुग्धस्य। तिमिरस्य कः वर्णः ? तिमिरस्य कृष्णो वर्णः। अहं नैव वदामि। सोऽद्य कुत्र गच्छति ? त्वं मम गृहे अद्य आगच्छसि किम् ?

पाठ ३०

मैत्रस्य भूषणं कुत्रास्ति? त्वं पत्रं किं न लिखासि ? यत्र बुधो गच्छति तत्र त्वं किं न गच्छसि ? गृहस्य द्वारं अत्रास्ति। रामचंद्रस्य वस्त्रं कुत्रास्ति ? सलिले कमलं किं नास्ति? कृष्णस्य भूषणं कुत्रास्ति ? देवदत्तस्य पुस्तकं तत्र नास्ति। भूपस्य नगरं अत्रास्ति। स नगरादागतः। खादति फलं सः। त्वं फलं किं न खादसि ?

अहं इदानीं वनं न गच्छामि। सदा तत्र गच्छति विश्वनाथः। स इदानीं जलस्य समीपे गच्छति। तस्य पुस्तकं पुराणं अस्ति। तस्य नगरं विशालं अस्ति। कृष्णस्य हस्तो बलिष्ठोऽस्ति। मुकुंदस्य वस्त्रं नवीनं अस्ति। रामो विज्ञो भवति। वाचालो हरिरिदानीं वदति। श्वेतं दुग्धं अर्जुनेन पीतम्। रघुनाथः कृष्णोऽस्ति। वनं हरितं अस्ति। सः मनुष्यः अंधोऽस्ति। त्वं धीरोऽसि। तस्य गृहस्य द्वारं ह्रस्वं अस्ति। त्वां सः जलं आपयितुमिच्छति। त्वं वनं गन्तुं इच्छसि ? किं मुकुंदो भूषणं द्रष्टुं इच्छति ? रघुनाथो वीरोऽस्ति। किं कर्तुं इच्छसि त्वम् ? सोऽत्रागन्तुं नेच्छति। स तत्र खादितुं इच्छति। किं त्वं अत्र खादितुं नेच्छसि ? स पुस्तकं नेतुं इच्छति। गोविंदः पुस्तकं पठितुं नेच्छति। त्वं किं इच्छसि ? तव वस्त्रं रक्तं अस्ति किम् ? तव वर्णः कृष्णोऽस्ति किम् ?

रामचंद्रस्य नवीनं पुस्तकं शोभनं अस्ति। मुकुंदस्य पुराणं पुस्तकं शोभनं नास्ति। रामस्य नवीनं गृहं कुत्रास्ति? विज्ञस्य नरस्य शोभनं पुस्तकं अत्रास्ति। त्वं शोभनं वनमिदानीं गच्छसि किम्? नहि इदानीं अहं तव विशालं गृहं आगच्छामि। स नरः भूपस्य शोभनात् गृहात् इदानीं आगच्छति। स कृपणः पुरुषः इदानीं कुत्रास्ति? कृष्णः रामं प्रति वदति। रामेण सह विष्णुमित्रः वदति। रघुनाथेन साकं हरिः नगरं गच्छति। मासेन पुस्तकं कृतम्। तेन अहं मूढः कृतः। भूमित्रो तस्य भूपस्य नगरं गतः।

मम सकाशात् स यदि पुस्तकं नेष्यति, तर्ह्यहं दास्यामि। तव सकाशात् यद्यहं वस्त्रं नेष्यामि तर्हि त्वं दास्यसि किम्? मुकुंदो गमिष्यति किं सत्वरं? त्वं सत्वरं मह्यं पुस्तकं देहि। सत्वरं स पत्रं लेखिष्यति किम्? स तुभ्यं पुस्तकं दास्यति किम्? रामः पात्रं पश्यति किम्? मया तस्मै सलिलं दत्तम्। त्वया तस्मै पात्रं दत्तं किम्? तेन मह्यं फलं दत्तम्।

भूपस्य नगरं को गतः? मुकुंदः अथवा रामः? त्वया तस्मै किमपि उक्तं किम्? देवदत्तो गृहादागतः। अहं नगरं गतः। उद्यानादागतः। वाचालो मुकुंदो वनादागतः। अद्याहं दुग्धायागतः। अद्य त्वं चंदनाय गतः किम्? त्वं इदानीं अत्रोपविश। त्वं अद्य अत्रैव तिष्ठ। त्वं अद्य पत्रं लिख। त्वं श्वः प्रातः फलं खादिष्यसि किम्?

पाठ ३१

रामो रक्ताय वस्त्रायागतः। विश्वनाथो नीरायोद्यानं गतः। रघुनाथः पुष्पायोद्यानं गतः। स नगरादागन्तुं इच्छति। अहं त्वया सहागन्तुं इच्छामि। स मया साकं पठितुं इच्छति। अहं तेन सह धावितुं इच्छामि। रामः कृष्णेन साकं वक्तुं इच्छति। कृष्णः पात्रं कर्तुं इच्छति। अहं भूषणं दातुं इच्छामि। मया सह पुरुषो वदति। त्वया सह स नरः वनं पश्यति।

यत्र स खादति तत्राहं न इच्छामि। अहं अत्र खादामि। त्वं कुत्र खादसि? यत्र स पठति तत्राहं पठामि। कः पठति? किं पठति? स किं पश्यति? रघुनाथ इदानीं न पठति। त्वं अधुना किं खादसि? अधुना किं न खादसि? अहं दिवा खादामि। स रात्रौ खादति। त्वं द्रुतं खादसि। त्वं फलं खाद, अथवा मा खाद। जलात् कमलं नय। तोयात् फलं तत्र नय। सलिलात्कमलं तत्राहं नेष्यामि। त्वं तत्र सलिलात्कमलं नेष्यसि किम्? स तस्मात्तोयादागच्छति। स तस्मिन्सलिले कमलं पश्यति। स तस्मिन्पात्रे पुष्पं पश्यति। स वने पुष्पं द्रक्ष्यति। त्वं गृहे पुष्पं द्रक्ष्यसि किम्?

त्वं पुस्तकं द्रुतं पठ। यदि त्वं पुस्तकं पठसि तर्ह्यहमागच्छामि। स सत्यं वदति। भूपो ह्य आगतः। त्वं मया सह वद, नोचेदहं गमिष्यामि। त्वं लिख, नोचेदहं लेखिष्यामि।

त्वमत्रैवोपविश नोचेदहं गमिष्यामि। त्वं आगच्छसि चेत् तर्हि अहं अत्र तिष्ठामि। त्वं तत्र तिष्ठसि चेत् अहं आगमिष्यामि।

त्वमागच्छ नोचेदहं गमिष्यामि। त्वं अन्नं कुरु, अहं खादितुं इच्छामि। खादितुं आगच्छामि। त्वं करं भ्रामय। रघुनाथः कृष्णाय पात्रं दास्यति। शोभनं पात्रं दुग्धाय दास्यति। स दुग्धाय शोभनं पात्रं नेष्यति। त्वं अत्रैवोपाविश, तुभ्यमहं वस्त्रं दास्यामि। त्वमत्रैव तिष्ठ। तुभ्यमहं दुग्धं दास्यामि। त्वमत्र स्थातुं किं नेच्छसि? अहं त्वया साकं वदितुमिच्छामि। त्वं मया सह वदितुं नेच्छसि किम्? स त्वया सह वक्तुमिच्छति। त्वं तेन साकं वक्तुं किं न इच्छसि?

अहं तुभ्यं चंदनं दास्यामि। त्वं मह्यं वस्त्रं दास्यसि किम्? रघुनाथो मुकुन्दस्य गृहे उपवेष्टुं किं नेच्छति? त्वमेव तस्य गृहे उपविश। त्वं पुष्पं द्रष्टुं इच्छसि किम्? यत्र त्वं गन्तुं इच्छसि तत्र गच्छ। त्वं कुत्र गन्तुं इच्छसि? अहं तत्रागच्छामि यत्र त्वं गन्तुं इच्छसि। यत्र त्वं खादितुं इच्छसि तत्राहं नागच्छामि। यत्र त्वं पठसि तत्राहमागच्छामि। अहं यत्र पठामि तत्र त्वं किं न पठसि? अहं यदा खादामि तदा त्वं किं नागच्छसि? सायमहमत्र खादामि। प्रातरहं फलं खादामि। यदाहं पश्यामि तदा त्वं किं न पश्यसि?